णभयंदर्शयंतिविरज्यमानंनायकमनुकूलयितुमाह उन्मूलेतिइति उन्मूलयंतीवेत्यर्थः इमानितवरे विरज्यमानस्यावधीरणवशेनविसं
स्थूलमबधूलक्ष्यंयथाभवतितथाचलन्नयनाद्दृश्येषुदृष्टेष्वालोकनेषुतानि एतेनास्तांविरागोविरागसूचकेनावलोकनेनापितवप्रियेल
ग्नाहमितिभावः ५७ विरहविधुरत्वंसूचयंतीनायिकाविरलदर्शनंकांतमाह णमुअंतीति नमुंचंतिदीर्घश्वासान्नरुदंतिचिरंनभवति
कृशिताः धन्यास्तायासांबकुवल्लभवल्लभोनत्वंअस्माभिःस्तुत्वामासाद्यसर्वमिदमनुभूयतेइतिभावः ५८ प्रातःप्रस्थितायाःप्रियायाःपरि
वृत्यालोकननायकः स्वसौभाग्यख्यापनार्थमाह णिद्दालेति स्फुरतगोजोरानिद्रालसपरिघूर्णनशीलश्चानुरागार्तिर्यक्चलदर्धतारकालो
कोदर्शनंयेषुतेदृष्टिनिपाताश्चक्षुःप्रपंचाःशशिमुख्याः कामस्यापिदुर्विषहाःधैर्यमुच्यतिकृतः किंपुनःकामातुराणामितिभावः ५९ चि श्रीः
रप्रोषितप्रियागमनंप्रतिनिश्चयाशतांसौभाग्यंदृष्टभक्तितांपुनर्विरहभयमनुरागंचात्मनःकुलटाकमपियुवानंप्रतिहृदयनिषेधछलेनाह १५
जीविअइति पाशानामन्योन्यबंधकृतोदुर्मोचोग्रंथिर्दुर्दोलितिप्रसिद्धा तस्यममचप्रेम्णःपरस्परानुबंधादुर्मोचोग्रंथिःप्रेमदुर्दोली साचि
रविरहक्षीणतयाजीवितशेषयामयाकथकथमपिगमिता आगमिष्यतीतिप्रत्याशयांबंधुजनाभ्यर्थनयाचात्मवधपातकभयान्नप्रेरि

तेत्यर्थः एतेनपूर्वप्रियगमनप्रत्याशात्यागःसौभाग्यंदृढभक्तिताचात्मनःकथिता इदानींविरमरे दग्धहृदयेति तादृशविरहदाहमनुभूयपुना
रन्यमीतिमनिर्वेदंसंबोधनं मारज्यःकुत्रापित्यनेनपुनर्भाविनोविरहाद्भयं अननुरक्तस्यानिषेधायोगादनुरागश्चनायकंप्रतिदर्शितः ६० नाय
कस्यानुरागवृध्यैदूतीकृत्याश्चिद्दंतनखक्षतावलोकनकौतुकमाह अज्जाइअति वरस्त्रियानवनखक्षतस्यनिदर्शनेःवलोकनेगुरुकयवनो
तुंगप्रतिमागतनिजनयानोत्पलार्चितंभवतिस्तनमदृष्ट ६१ स्त्रीसेवांप्रतिविमुखानभिमुखयितुंकामुकजनंचप्रोत्साहयितुंनिसृष्टार्थादूतीनमस्का
छलेनभगवतोहर्षकेशस्यकामपरतामाह तणमहेति रेदुर्विदग्धाः तंनमत यस्यवक्षसिलक्ष्म्याअंकारूढायामुखंकोमुभेसंक्रांतं सूर्यमं
डलेकलंकरहितं शशिमंडलमिवदृश्यते एतेनकामस्यपरमोपादेयत्वमुक्तम् ६२ प्रियानुनयार्थंदूतीकर्महांतरिताह माकुणेति अवकाश
दानात्प्रतिपक्षस्यसपत्नीजनस्यस्फुरंतंमाकुरु अनुनयप्रियंप्रसादलोभयुक्तंप्रसादाभिलाषिणं अन्यथाप्रतिगृहीतगुरुकमानेनपुत्रिबृहत्को
डात्यादिमानेनगर्वाशिरश्चंचक्षिणाभविष्यसि अनुनयेत्वरसौमानीप्रियोनत्वामनुनेष्यतीतिभावः ६३ विरहोत्कंठिनायाःविरहार्तीव्यंजयं
तीदूतीतत्कांतमाह विरहकरवतेति प्राकृतेसमासेपूर्वनिपातानियमः तेनायमर्थः दुःसहेनविरहकरपत्रेणपाट्यमानस्यतस्याहृद
यस्यकज्जलमलिनत्वान्नेयंप्रोषितभर्तृका ६४ विदग्धनायिकासमागमोत्सुकंयुवानंदूतीनिषेधमुखेनरोचयितुमाह दुणिक्खे
वेति दुर्निक्षेपकमेतदपुत्रकेतिविश्वासनार्थंसस्नेहंसंबोधनं मासाहसंहृदयनिक्षेपरूपंकरिष्यसि येनहेतुनाअत्रनिहितानिम
न्येहृदयानिनपुनर्लप्स्यंते एतेनचातुर्यादिनामनोहरत्वंसूचितं ६५ नायिकायाः स्फुरतस्फुरानुसादविलक्षणस्ययूनोवेमुख्यमाशं

क्यदूतीनस्याश्चिररतताद्दोषपरिहारार्थमाह णिवुतेति निर्वृतरतापिवधूःस्मरतावसानस्यस्थितिमजानंती अविरतहृदयाअन्यदपिकिंचिदसी
न- तिचिंतयति एतेनाधिकेच्छानुपालनरसोमाध्यंचोक्तं ६६ भुजंगजनंरोचयितुंकुईनीवेश्याप्रेमस्तुतिमाह णंदंत्थिति स्मरतंविविधं तद्वि
१६ विधंबाह्यमाभ्यंतरंच तत्रचुंबनालिंगनादिभिर्बाह्यं स्त्रियापुरुषेणचनानाकरणेरूपसृष्टंकरवप्रयोज्यमाभ्यंतरं तत्रस्मरतेसरभसानितृष्णाप
हारिणियथाभिमतसंपादकानिसकलोकस्योत्तममध्यमजनस्यबहुभिर्मार्गैहसितशुष्करुदितचादुप्रमुखैर्विनिर्मितानिवेश्यास्त्रीणांप्रेमाणिनंद
तुलाभसत्कारभाजिभवंतुइत्यर्थः ६७ दुर्बलायितासीतिहसित्वाप्रियेणोक्ताविरहोत्कंठितातमाह अप्यतेति प्रियापराधजश्चिंतसोभोमन्युःनया
मंमन्युदुःखंयेनसतथाभूतः किमांकुशायितोतिपृष्टसिबाह्यत्वात्तेनेहस्यहमन्याभूहि ताचलचलीत्तंप्रियंजनंततस्तवकथयिष्यामीति इदानीं चिं०
कथितेपिनतेप्रत्ययोभविष्यतवास्थिरस्नेहत्वान्ममेयंदशेत्याशयः ६८ चिरागतंकांतंविरहोत्कंठितासनिवेदमाह अवहेति अवधार्यमरवीवच
नानियेषांप्रियाकृतेनकारणेनरमितोसि एतानितानिसौख्यानिसंशयोयेषांजीवित्य अस्तुतावत्स्मरंत्वद्विरहादिदानींजीवितमेवसंदिग्धमित्या
शयः ६९ प्रतिवेशिन्यालापछलेनदूतीमधूकनिकुंजंनिगमिष्यसितस्यागृहमेवगमिष्यसीतिससंकेतंजारमाह इत्यादिति ईर्ष्यालुःपतिस्त
स्यागत्रोमधूकंनदद्यात्युच्चैतुउच्चिनोत्यात्मनेवमातः अस्पृजुकस्वभावः गृहेजारागमनाशंकनात् ७० अंकोडिभार्याजितकेलिधृताकांता १६
धृतवस्त्रांचलंबलादाकृष्यवस्त्रैकदेशप्रस्थितेमंथरंत्वंव्रज अस्तुतावन्ममप्रणयभंगः द्रुतगमनेनस्तनभराद्यासितस्यमध्यस्यापिभंगन
चिंतयसि ७१ विज्ञत्वज्ञापनार्थंविदग्धःसहचरपथिकप्रपापालिकयोरन्योन्यानुरागमाह उद्वस्तौविति पिपासागमेपिजलपानछले

नमुखावलोकनकुतूहलाद्दूर्ध्वाक्षःपिबतिजलं यथाजलपानायविरलांगुलिश्चिरंपथिकःप्रपापालिकापिदनुरोधात्तन्मुखावलोकनकुतूह
लार्थंतथातथाधारांतनुकामपितनूकरोति ७२ भिक्षादानायनिर्गतावधूः किमितिचिरयतीतिश्वश्वूवचसिसपत्नीभिक्षाचरभिक्षादात्र्योरस्यंना
सक्तिमाह भिक्षुरिति भिक्षाचरःप्रेक्षतेनाभिमंडलंसापिभिक्षादात्रीतस्यमुखचंद्रंदृष्ट्वोरपिकरकंतच्चचदुकंभिक्षाभांडकाकाविलुंपतितद्भ्रमतं
दुलादिकंवादपनीत्यर्थः ७३ प्रियमनुनेतुंप्रशंसयंतीसपत्नीकलहांतरितामाह जेणविणेति येनविनानजीव्यतेनप्रणयतेसोःनुनीयते कृता
परोधोपि प्राप्तेपिनगरदाहेमणकस्यनवल्लभोग्निः अथवानायिकेवनायकानुनयार्थमाह ७४ विदग्धकामुकंशंसयितुंकापिग्रामनिंदाछलेना
त्मनोवैदग्ध्यंसर्वासांनिर्वेदमाह वंकंकाविति ग्रामरच्चेरतीवबहुलेहतग्रामे वक्रंकःप्रलोक्यते इंगितज्ञजनाभावेनकटाक्षस्यनिष्फलत्वा
दितिभावः कस्यकथ्यतेमुखंचेति स्वक्रंदनाद्यनुभवदुःखंचेतिमन्मथोमाथःकेनसमंवाहस्यते परिहासेनदुःखप्रेर्यतइत्याशयः ७५ मनोर
थसिद्धिहेतावपिमनोविकारोनीतिनिदर्शयन्नागरकःसहचरमाह फलईति फलहीवाटकःकार्यासीक्षेत्रंतस्यपुण्याहायशःभक्षणप्रथम
कर्षणाय पच्छांगलं तत्रमंगलमालेपनादिदानंकुर्वेत्याअसत्याःमनोरथगर्भिताया स्तत्रकार्यासवाद्यामयारंतव्यमितिहृदिन्यस्तमनोरथाया
हस्तोथरथरायतः वेपथुभाजोभवतः ७६ सपत्नीसख्याःशिक्षार्थंधूर्त्तोचरितमाह पहीति उत्पूरणंछेदनं पथिकछेदनशंकाकुलाभिरस
तीभिरस्यकाकविद्याशंकयापत्रछेदस्यवासकग्रहणस्यचनिषेधार्थमाह तर्पणेनालेपनेनिभृतंवटस्यसिक्तानिपत्राणिनिधुवनसंके
तस्थानतस्यवटस्यसुप्रसिद्धा अतआरुर्यणलेपनेनकाकविद्याशंकयाःस्यपत्राणिपाथानछेत्स्यंतीतिभावः ७७ दंतधावनार्थंसंकेतक

रंजककुंजशिखाभंजकममतीसोपालंभमाह भंजंतस्रोति भंजतोपितरस्वर्गगामिनोनदीकरंजशाखाः भणकथमद्यापिधार्मिकपादोधरणीमेवस्पृ
शतःक्रांत्वैवस्वर्गंजिगमिषुरयंपादिकयास्तितोदूरस्थशाखांगंकुर्वेनकथमद्यापिस्वर्गेनगतोसीतिभावः ७८ मृतायामपिजायायांहालिकस्य
१७ प्रेम्णःप्रशंसाव्याजेननायिकानायकंप्रेमानुबंधस्थैर्यार्थमाह णिक्कमेति निष्कर्मणोपिक्षेत्रात्पामरोनेयंजनिवसतिगृहं मृतयाप्रियजायया
शुन्यीकृतंदुःखंतेनदुःखंतत्परिहरन् अयमाशयः ईदृशंतस्यमभवतियेनमृतभार्यापामरोगृहवासादरण्यवासंबहुमन्यतइति ७९ प्रोषित
भर्तृकायाःसखीतत्कांतसमीपगामीनंपथिकंसंवादमाह झंझेति झंझावातोवर्षावतस्तेनोन्मूलिते तृणीकृतेगृहविवरप्रगटात्सलिलस्यधा
रातः कुड्यलिखितावधिदिवसंरक्षतिमहिलाकरतलाभ्यां एतेनावधावुन्मीर्णेदुःकरजीवनंतस्याइतिध्वन्याभावः ८० कुलटायाःसंकेतस्था
नगमनत्वरार्थंतत्रान्यगमननिषेधार्थंचदूतीराजिकापत्रचर्वणार्तमर्कटव्यपदेशेनकामार्तनायकस्यसंकेतगतस्यस्थितिमाह गोणाएइति गोदा
वरीनद्याःकच्छेचर्वयन्राजिकायाःपत्राणिउग्रतातिमर्कटःस्वोक्त्येवइ काशते पोरंउदरंच पिट्टेइ आहंतीत्यर्थः एतेनमुहुर्मुहुरुदन्नधिकथित्वांप
श्यंस्त्वयिविलंबमानायांकामार्तिंनाटयन्नस्तीतिभावः अथवा अदृष्टकृसादावविचार्यप्रवर्तमानाअविश्यमनुतापमनुभवंत्यतःसुविचार्यप्रवृ
र्तितव्यंमर्कटव्यंचभक्षणासक्तानायांसंभाव्यमानंव्यभिचारमपह्नोतीतिभावः ८१ पूर्वसुभगायाःसखीतदलंकारेणान्यामसमानांमेलयितुमि १७
छोस्तत्कांतस्यामहिषस्यपशोरपिस्नेहवेशेनैवंकृतंक्षेपार्थंस्वभर्तुःस्नेहोचितविधिस्थैर्यमाह गहवईति इंदुआः गुरुघंटा गृहपतिनामृतमहिषस्य
बृहद्घंटान्वितंदामविरमुद्वातत्सदृशापरमहिषालंकरणार्थंचवर्गशतान्यनेकमहिषयूथानिनीत्वातदाभाव्या णवरि अनंतरंआर्यागृहेचंडि

कायतनेवधं एतेनममभर्त्राभूतस्य त्वंतुजीवत्यामेवप्रीयसार्थायांतदलंकारेणान्यामनुरूपामेवालंकर्तुमिच्छसीतिनैतदुचितमितिभावः ८२ सप
त्नीमपदुत्कर्षोद्दिग्नामभिनवसुभगांसखीसात्वयंतीसखीविभवादपिसौभाग्यंगरीयइतिप्रदर्शयंस्या सिहिइति पेहुणं पिछं गजमुक्ताग्रहीतप्र
साधनानांमयूरपिच्छावतंसाव्याधस्यवधूकागर्वितेतियेनयूथंकरिवरान्हत्वातत्कुंभमुक्ताफलैःप्रसाधिताः सएवेदानींमत्संभोगातिप्रसक्तिक्षी
णोमयूरमात्रमारणक्षमःसंवृत्तइतिसौभाग्येनजातगर्वाभमति ८३ वेश्यामातामुजंगप्रोत्साहनार्थमाह वंकेछिति कटाक्षप्रेक्षणशीलानांसाभिप्राय
वचनप्रत्युक्तिशीलानांविभ्रमभंगुरभ्रमणशीलानां गणिकांगनाजनानामित्यर्थात हेपुत्रकपुण्येर्जनःप्रियोभवति धन्यास्त्वमसियेनैवंविधायिमम
दुहितात्वांप्रत्येवमुरक्तेतिभावः अथवा कथमपिवेश्यानुरक्तंप्रतिकस्याश्चिन्निषेधवादोयं ८४ असतीविजनेगोदावरीतीरलतागृहेधनावव
स्थित्यामंकेनविघ्नकारिणंधार्मिकमाह धम्मिएति धार्मिकभ्रमविश्वस्तःसकुक्कुरोवमारितस्तेनागोदावरीतटविकटलतागृहवासिनामदृष्टमि
हेन अत्रभ्रमतिविधिरूपेर्थेवाच्येध्वनिनालतागृहेसिंहसंचारसूचनेननत्रगमननिषेधस्यप्रतीयमानत्वाध्वनिरलंकारः ८५ विदिताभिप्रायो
ममयेतिरोधयन्कश्चित्सरिहासशीलःकमपियुवानमाह वाएरिति वातप्रेरितेनकर्णावतंसीकृतोसलरजसाभृतंमेचक्षुरिति अपदिशंस्यास्मड
जोपनयनार्थमक्षिस्फूत्कुर्वन्स्फूत्कारव्याजेनैवात्मृष्णंचुंबन् तदवलोकनकौतुकेनैवानिमिषनयनत्वादेवंविधपुण्यफलभागित्वाच्चकोदिवा
नींकनमोदेवस्त्वं प्रसिद्धास्त्रावधेदेवास्तेपिनैवंविधपुण्यफलभागिनइतिभावः ८६ कांतानयनत्वरार्थंमदनार्तिमभिनयंतीप्रोषितभर्तृका
सखीमाह सहीति सखिव्यथयंतिकदंबकानियथामांतथानशेषकुरुमानि नूनमेषुदिवसेषुवहति गुलिकाधनुःकामः वर्षासुगुलिकाका

रेणकदंबकुसुमेनकुसुमास्त्रोमांतापयतीत्युत्प्रेक्षा ८७ विरहोत्कंठितायाःसर्वास्त्रीवधपातकभयानिदर्शयंतीत्कांतंतदुपगमार्थमाह णा
हंदूइत्यादि नाहंदूतीनत्वंप्रियःअस्मद्वचनाग्रहणान्नवयंप्रियाइतिभावः इयतोहेतोःकोस्माकमत्रव्यापारःप्रियस्त्वान्नैवतदनुकंपनमित्याश
यः सापुनर्ग्रथितेनतवविरहेणतवचस्त्रीवधादपयशइति तेनधर्मोक्षरमुभयहितंधर्महेतुंसंक्षिप्तंगणामः ८८ प्रियेकिंमामनपराधस्त्यजसीतिवदंतं
कृतचरणपातमनुनयंतंकांतंरुदितायुवत्यंतरलग्नादिकालिंगनसूचकंचिह्नंदर्शयंतीसोपालंभमाह नीअेति तस्यामुरुवातवमुरुवंतवमुरुवादपिमम
चणे हस्माहस्तेवहस्तेनसंक्रमादिवागतः लाघवातिशयशिल्पनादतिदुष्करश्लिलकइतितिलकोपालंभच्छलेनयुवत्यंतरसंगचिह्नमाविष्कृतं ८९ इय
मस्मिननुरक्तेतिनागरकःसहचरमवगमयन्नाह सामाईति संकेतस्थानेगमनसूचकेनजंबूपत्रेणकृतावतंसश्चासौभ्रमणशीलश्चेतितथाभूतेहलि
कपुत्रेसतिनिष्फलार्थमद्यैषिप्रेक्षिण्याःश्यामायाःसंकेतितसमयलंघनवैलक्ष्येणखेदेनचमुखशोभाश्यामलायते स्वयमेवमलिनाभवतीत्यर्थः ९० कल
हांतरिताकांतानुनयायदूतीमाह दूईति दूतीत्वमेवकुशलाकर्कशमृदुकानिजानासिवक्तुं कंदूतिपाडुरंयथानभवतितथात्वंकरिष्यसि यथा
कंडूयनकौशलेनकंडूशाम्यवैरुद्यंचनभवतितथात्वमपिमृदुकटुकेनवक्ष्यसीयथासौनोद्विजतेमांचभजतइत्याशयः ९१ दूतीकमपिविद
ग्धंकस्याश्चिदनुरागमाह महिलेति महिलासहस्रभरितेतवहृदयेसकलागस्थानमलभमानादिवसंअन्यन्यकर्मांगंतनुकमपितनुकंकरोति
प्रतिदिनंत्वत्संगमागमोपायचिंतयार्क्षीत्यतइत्यर्थः ९२ कापिप्रत्यक्षदृष्टापराधपरिहारोचितत्वत्युत्तरकुशलांसखींसबहुमानह बिकवेइति विशे
षकारिणिप्रतिवादिवचनात्कंदकानिप्रियजल्पितानिसप्रत्ययोसादनकौशलानिपरहृदयनिर्वृत्तिकराणिविरलःखलुजानातिजनःसहसाप

राधेऽप्रन्नेजल्पित्तव्यान्यभिधातव्यानित्वमेवपरमादराणिप्रियवचनानिवक्तुंजानासीतिभावः ९३ कोपिप्रियांप्रत्यनुरागातिशयंसूचयंस्तत्सखी
माह रवणमेत्तमिति क्षमात्रमपिनापयाति अनुदिवंविर्नाणेर्णादनोगुरुकःसंतापोविरहकृतःपक्षे अनुस्मरणेकृतश्चप्रयासोतथाप्रच्छन्नपा
पशंकेवश्यामर्मीममहृदयात् ९४ कापिरूक्षशिल्पाकृतापराधमनुनयंतंसविनयरोषमाह अज्जुएति हेअज्ञनाहंकुपिताउपगूहआलिंग
किंमुधामांप्रसादयसि तवमन्युसमुत्सादकेन प्रणयरोषेणापिअनभिज्ञेस्वामिनिमानोनिष्फलइतिभावःनकार्थे ९५ संकेतित्तकदंतीर
लतागृहमहंगतात्वंतुनगतइतिप्रतिपादयंतीमध्याह्नाभिसारिकाजारंप्रतिसत्यपिकोपेहृदयस्यास्थिरस्नेहतांसज्जनहृदयप्रशंसाच्छलेनाह
सरएइति शरदिमहाह्रदानांमतःशीतानिबहिरुष्णानिजातानि कुपितसज्जनहृदयसदृक्षाणिसलिलानि ९६ विरहोत्कंठितायाः
सर्वांतत्कांतमाह दीहुण्हेति दीर्घोष्णप्रचुरनिश्वासप्रतप्तोबाष्पसलिलपरिषिक्तःसाधयस्याग्निपानीयसामसबलंव्रतविशेषः यावान्सोप
विश्यतेव्रतमिवतस्याधरःवियोगे ९७ करयाश्चिन्मोग्ध्यवर्णनप्रथमाभिसारस्वीकारमाह आअसेति आगतस्यकिंनुकरिष्यामि किंव
क्ष्यामिकथंनुभविष्यतीदमभिसरणसाहसमितिप्रथमसाहसकारिकायाहृदयंथरहरायतेभयेनकंपते ९८ उत्कंठितोविनोदार्थंक
लहांतरितांकांतासहचरमाह आअंबेति प्रणयरोषादाताम्रांतकपोलांसवलिताक्षरजल्पनशीलांस्फुरदोष्ठींमास्पृशेतिसंगेयंसमप
सरंतींप्रियांस्मरामःपत्नीमितिभावः ९९ करयाश्चिदर्चितायागणिकायाभुजंगजनेनक्रियमाणांश्लाघामसहमानानिजगुणगर्वमभिव्यं
जयंतीकाचिदाह चिरंडेपीति चिरंडिपिंडीधिरस्तु देशीयशब्दः फल्गुकिमपिनजानंतोलोकाः लोकैर्गतानुगतिकताद्यावोगोरवे

णयहारजस्यलांवल्लान्निवारणगर्हितारुवर्णकारतुलाइवनिरक्षराअपिपक्षे निर्विदग्धाअपिस्कंधेरुह्यतेसादरंनीयतेइत्यर्थः २०० इतिस
प्तशतकेद्वितीयशतकविवरणं २ श्री रसिकजनहृदयदयितेकविवत्सलश्रमुखरुकविनिर्मिते सप्तशतकसमाप्तंद्वितीयं
गाथाशतकमेतत् १ कापिकामिनीमानग्रहणार्थंशिक्षयंतींबंधुपुरंध्रीमाह केलिएति केत्मापरिहासेनापिशेषःकर्तुनशक्यते तस्मिन्
च्युतविनयेरतिलोल्यलंघितविलज्जेयाचितकेनिर्लज्जेरिवाप्यर्थानीतैरीदृशैरवशैरस्वाधिनैः अथवातेस्यैवचाटुचातुर्येणयाचितैरि
वावशैरदाक्षिण्यपरतंत्रैरेगैः योनिर्वोढुंनशक्यतेतन्नकर्माचरणीयं येनविनानजीव्यतेतस्मिन्कृतापराधेपिरोषोनकर्तव्योस्तथाचातिशयि
तः कोतेप्रणयातिशयःसूचितइतिभावः १ विदग्धानुरंजनार्थंवैदग्ध्यंव्यापयंतीकाचिदुत्कुल्लिकयाक्रीडंतींबालंवारयंत्याह उत्फुल्लिअेति
उत्कुल्लिकापदोपविष्टानांमुहुरुसतनोत्सतनरूपाक्रीडोत्कुल्लिका फूदाःफूयिकेतियस्याःप्रसिद्धिः ततश्चायमर्थः उत्कुल्लिकयारंवलंतींयो
नावारयतभवतुपरिक्षामेयं श्रमेणजितश्वासाकृशमध्याचभयत्रिस्राशयः माजघनभारागुर्वीपुरुषापितंविपरीतकेलींकुर्वंतीक्लांताभ
विष्यति २ कुलजायाः शीलखंडनविलक्षायाश्चिंतसंभार्जनार्थंतत्सपक्षपातिनीकाचिदाह पउरेति प्रचुरयुवाग्रामोनधुमासोयौवनं
पतिर्वृद्धः जीर्णरुरास्वाधीनातदेवमप्रतीकारदारुणेषुसत्स्वसतीमाभवतुकिंम्रियतां तदलंपरिवेदनाभिज्ञस्यजनस्यैनांप्रत्यपवा
देनेतिभावः २ इतिकथयित्रीधूनोमनोहरणार्थमाह बहुसोविइति बहुशोपिकथ्यमानंतवचनंममहृत्संदिष्टंमहारेणसंचा
रिसंपुनःपुनश्चवणानुरागान्नश्रुतमितीजल्पंतीपुनरुरुशतंकरोतियोषित् ४ दूतीकुलजायाःकमपियुवानंप्रत्यनुरागंसंवरणंकी

शलंचाह पाअडिअेति प्रकटितस्नेहसद्भावनिर्भरंतयायथलंदृष्टःसंवरणव्याहतयातत्सलाघनव्यग्रयाअन्योपिजनस्यैवदृष्ट इतियोज्यं ५
पुत्रस्यदंतोद्गमकथनच्छलेनभार्यासंभोगसुखानुभवसमयप्राप्तिमाह गेण्हेति गृहीतंश्लोकयतइदंविकसितवदनापत्युरर्प्ययति
जायासुतप्रथमोद्भिन्नदंतयुगलांकितंवदनं कोलफलं अयंभावः बालापत्याद्यदृष्टविरोधंपरिहरंतंपतिंप्रतिपुत्रस्यप्रौढत्वंबोधयंतीकृतु
नैव्यर्थतानेयइतिज्ञापयंतीति पुत्रलालनादपिसुरतसुखंगरीयइतिवा अथवानुपभुक्तंबदरफलमिवरमणीयंममयौवनंमाविफलीकुरु
अथवास्वयमेवकोलिफलेक्षतांसंपाद्यपुत्रेणक्षतमितिमिथ्यैवदर्शितवतीग्रहसीतवदनेत्यनेनध्वन्यते ६ मिथ्याजनोवदतीत्यनुनयं
तंकांतंमानिनीप्रणयरोषमाह अछउइति मांप्रतिमंदस्नेहोसीत्यनुतावज्ञानवादः हृदयमेवात्मनस्तवप्रमाणं आत्महृदयेनैवत्वंजा
नासीत्यर्थः तथात्वमपिमंदस्नेहोयथानोपालंभयोग्योसि ७ यथाभिमतकांताप्राप्तिंसूचयंतीकमपियुवानंरोचयितुमाह अप्पछंदेति
स्वेछाचारित्वसूचनार्थंआत्मछंदप्रधावनशीलेतिसंबोधनं दुर्लभस्यसुखस्यलंभःप्राप्तिर्यस्मात्तंजनंविमार्गयन्नान्विष्यत् आकाशपथेनिर
वलंबनमार्गेभ्रमन्नेहृदयकदापिभक्ष्यसि अपिशब्दः संभावनार्थां कस्मिन्कालेभगप्राप्स्यसि कःखलुसुभगोधावंगतंकरीष्यतीत्यर्थः
८ गुणाभिमानिनीकाचिदसुतावदन्यत्कथनमस्माकंगुणानपिनबहुमन्यतइत्युक्तासोद्वेगाकांतसहचरमाह अहवगुणेति
अथवागुणाएवलघवःपरिभवभूमयः अथवागुणज्ञोनसलोकःसमेपतिः अथवाअहमस्मिनिर्गुणावाअन्योजनोबहुगुणवान्अन्या
प्रियातस्ययेनमानबहुमन्यतेइत्याशयः ९ कमपियुवानंप्रतिजातमन्मथोन्माथाकुलजाकिमित्युद्वेगकारणंनकथयसीतिमातुला

न्याष्टष्टातामाह फुदृंतेणेति निरावरणादुःखनिर्वेदनस्फुटतापिहृदयेनमातुलानिकथंदुःखंनविद्यते तस्मिन्दर्पणेअदाएव आदर्शेति
लिंगात्देशीप्रतिबिंबमिवयस्मिन्दुःखंनसंक्रामति १० प्रयत्नसाधितामपियुवतींविमुखीकारितयानोपगच्छतनायकमुत्साहयितुंदूती
सोपालंभमन्यापदेशेनाह पासासमिति पाशाशंकीकाकोनेच्छतिदत्तमपिपथिकगृहीण्याअपवृत्तादधोमुखीकृतात्करतलाद्गलितस्य
वलयस्यमध्यस्थितंपिंडंभक्तगोलकं त्वमप्यनांप्रयत्नमनयादीयमानामपितांपरिहरसीतिभावः ११ प्रोषितभर्तृकायाःसर्वात्कांतस्यात्
मनत्वरार्थंतद्दृष्टांतमाह ओहिदिवेति अवधिदिवसाधिगमाशंकनशीलाभिः सखीभिरुक्तस्यालिखनशीलायाः द्विस्त्रिस्त्रेवगतेदिवसेकुड्यले
खिताःरेखाःप्रोच्छते अवधिदिवसेपित्वयिनागच्छतिनूनमियंप्राणानपिजह्यादितिभावः १२ ज्योत्स्नायांप्रिययासहविरहन्संपूर्णमंड
चंद्रमवलोक्यनायकः प्रियामुखप्रशंसार्थमाह तुहमुहेति तवमुखसादृश्यंनलभतेसंपूर्णमंडलोविधिना अन्यमयमपिवान्यप्रकारमिव
घटयितुंपुनरपिरंध्रयतेमृगांकः १३ क्वचित्स्थानंकृत्वास्थितस्यनायकस्यगमननिषेधार्थंसखीतस्रियावृत्तांतमाह अज्जंगेति अद्यग
तोद्यगतो घगनइतिगणनशीलयाप्रथम एवदिवसार्द्धकुड्यलेखाभिश्चित्रितं रेखाभिर्गृहभित्तिःपूरिता तदेवंतद्विरहविक्लवांतांविहं
यगंतुंनोचितमितिभावः १४ प्रमैथेसमागमदिनांतरेलज्जानम्रायाः प्रियायावैमुख्यमाशंकमानंसहचरमाह णाविनहेति नापितथाप्र
थमसमागमेयत्सुरतसुखंतस्मिन्प्राप्तेपिपरितोषः यथाद्वितीयादिवसमविलक्षलक्षितेदिनांतरेशृंगारव्यभिचारीभावेनलज्जया वनते
दृष्टेवदनकमलेपरितोषः १५ अपिसंयंकुरुममयाचाणामन्मथस्येतिमिथः सख्याष्टष्टासखीसंवेदग्ध्यंतामाह जेसमुहेति येसम्मु

MEMORIAL

खागतेघूर्णितवल्लिप्रियप्रेषितार्द्रावलोकेषाः अस्माकंमदनशरार्जनस्यैषसंतितेभवंतु १६ कामपिरमणींप्रतिसाभिलाषोयुवासपरितोषमाह
इअराधिति इतरइत्यकृतशासंचरणारत्यत्रतोजनस्तवजघनारोहणपूर्वकेणसंगमेनयत्सुरखंतन्नाप्नोति अनुभवतिकनकदोरीकृतवहपत
नानामाहात्म्यं मुहुरंभोमुहुर्जलप्रवेशस्यफलमित्यर्थः १७ नागरकःकस्याश्चिदनुरंजनार्थंचाटुमाह जोजस्सेति योयस्यविभवसार
स्संसद्दातिकिमत्राश्चर्यं अभवदपि यत्रचनास्ति तदपिदत्तंदौर्भाग्यंत्वयासपत्नीनां १८ उत्कंठाविनोदार्थंप्रियास्मरन्कश्चित्सहचरमाह
चंदसारिसमिति चंद्रसदृशंमुखंतस्याःसदृशोमृतस्यमुखरसस्यःसकचग्रहरभसोज्वलचुंबनंकस्यसदृशंतस्याः १९ दूतीविमुख्यका
रिणंनायकमुत्साहयितुमाह उप्पणेति उत्पन्नार्थसिद्धाभिलक्षितेकार्यअभिचिंतयन्गुणागुणान्गुणदोषांस्तस्मिन्नतिविचारसूक्ष्मप्रे
क्षित्वेनपुरुषोहंतिकार्यं ८ तस्मादविचारितएवरमणीयःपरस्त्रीसंबधइतिभावः २० प्रणयकुपितंकांतमनुनयंतीकापिसस्नेहमाह
बालएति हेबालकननरुणविशेषानभिज्ञेतिभावः त्वत्तोधिकंनिजमेववल्लभंममजीवितंतत्वयाविनानभवतीतितेनकुपितंप्रसादया
मि २१ पादपतितमश्रुबिंदुपातजातपुलकपरीतप्रेमसद्भावमालिंग्यास्याप्यमिथ्यापरवचनदूषितविचितयामयारेदितोसीतिवदंती
प्रियांप्रियः पुनरपिरंध्रवचनेनप्रत्येष्यसीतिकाकूक्त्यारंध्रवचसिश्रद्धामन्यदापिनकरीष्यसीत्यर्थः एतदेवदृढयन्नाह णपतिअंतिति
प्रत्ययंनाकरिष्यएवत्वं तवरोदनशीलायाइमेवाष्पबिंदवोममदृष्टस्यपुलकोद्भेदेनयदिभिन्नानाभविष्यन् अयमाशयः रंध्रव
चनेनतेममस्नेहसद्भावभाजिवचसिप्रत्ययोनाभूत् एवंस्याद्यदिपादपतितस्यप्रेमसद्भावसूचकत्वयावाष्प बिंदुस्पर्शादृष्टपुल

कोऽप्रमोनदृष्टःस्यादिति २२ असाध्यमपिसाध्यतेमित्रेणसतस्तदुपार्जनशीक्षार्थेनागरकःसहचरमाह तंमितमिति तन्मित्रंकर्तव्यंयत्किल
व्यसनेदेशकालेभित्त्यालिखितंपुतलमिवनघराङ्गुरवंनिष्टतिवेमुख्यंनाचरतीतिभावः २३ निभृतमपिधूर्ताःकालयंतीतिविज्ञत्वंख्यापय
२१ न्नागरकःसहचरमाह वहुआइति वधूकायानवीलतागृहेप्रथमोद्भूतशीलखंडनाविलक्षंतदर्शनगलज्जमिवोडीयतेविहंगकुलंश
कुनवशात्सशब्दैःपक्षैर्हाहाभणादिव एतेनतिर्यंचोपिदुश्चरितंगर्हयंतीतितदपिदर्शितं २४ कापिकमपियुवानंप्रतिमव्याजमनुमानमाह
सच्चंभेति सत्यंभणामिबालकनारुत्यसाध्यंवसंतमासस्य गंधेनकुरुवकानांसमागतास्म्यसतीत्वंनगता सखलितमेवमनोमे किंतुतेवंगि
तानभिज्ञत्वेनशीलंखंडितमितिभावः २५ दूतीनायकेनायिकानुरागमाह एक्केकमिति एकैकस्मिन्वृंतिवेष्टनस्यविवरांतरेतरलादत्तं
नयनंययासातथा त्वयिव्यतिक्रामतिबालकभावानभिज्ञेयंजरशकुनायितंतया यथापंजरबद्धःपक्षीप्रतिविवरंदत्तदृष्टिर्भ्रमतितथातया
पित्वदर्शनलालसयाभ्रांतमित्यर्थः २६ दूतीनायकायनायिकायादर्शनकौतुकातिशयमाह ताकिंकरेउइति तत्किंकरोतुयादित्वमसित
यावृष्टितिवेष्टप्रेरितस्तनयापादांगुष्टोल्लिखन्निसहांग्यापिनदृष्टः २७ प्रियस्मरणहेतावुद्दीपितमन्मथेपथिकःप्रियगृहिणीवृत्तमनु
स्मरन्नाह पियसमिति प्रियसंस्मरणप्रगलद्वाष्पधारापातभीतयादीयतेवक्त्रीवयादीपकःपथिकजायया २८ कमपियुवानमनु
रंजयितुंदूतीकथाश्चित्तेनहरेन्यसूचकंपरिवृत्यालोकनमाह तइइति त्वयिव्यतिक्रामतिबालकतस्याअंगानितथानुवलितानिप २१
रिवृत्तानि यथादृष्टमध्यतिपतंत्योबाष्पधारादृश्यंते २९ कापिप्रियतमविरहासहत्वमन्यापदेशेनाह तामझिमोइति ततस्मान्मध्य

मएववरंदुर्जनसज्जनाभ्यांद्वाभ्यामप्यलंनमेकार्यमित्यर्थः यथादृष्टस्वपतिरवलस्तथैवसज्जनोदृश्यमानः एतेनमध्यमस्नेहएववरःननुक्षण
मप्यदर्शनेनदुःखयन्प्रियतमइतिभावः ३० काचिदात्मनःपतिंप्रतिसाभिलाषांकामपिसेर्थ्यमाह अद्धच्छीति अर्धाक्षिप्रेक्षितंकटाक्षदृष्टं
माकुरु स्वाभाविकंयथाभवतितथावलोकय एवंकृतेसोपिरुदृष्टोभविष्यतित्वमपिमुग्धाकलिष्यसे ३१ कश्चित्प्रोषितःकुलपालिकांनि
जगृहिणीमनुस्मरन्नाह दिअहमिति खडुक्कि आरोषमृकाःदेशीयःशब्दःदिवसंप्रतिदिनं रोषमृकायास्तस्याःकृत्वागृहव्यापारंगुरुकेपिमन्युदुः
खेस्मरामःपादांतसंस्थस्य ३२ कमप्यनुरक्तंअधमस्त्रीसंगदोषेणपरिहरंतींदुहितरंवेश्यामातासानुनयमाह पाणउइति चांडालकुड्यांज्वलि
त्वाहुतवहोज्वलतियज्ञस्थानेपि चांडालाग्निनापियज्ञकर्मक्रियतइत्यर्थः तस्मान्नरक्तुतेपरिहर्तव्याविषमदशासंस्थिताविविधैर्गुणैरक्ता न
नपतिताःपुरुषाः ३३ सतीमार्यांबहुमन्यमानंयुवानमसतीसेवेदग्ध्यानुरागमाह जंतुज्जेति यत्तवसतीजायाअसत्यःसुभगयदयमपि
तत्किंस्फुटतुप्रगटीभवतुदूतीयंतवसमानोयुवानास्ति ३४ कापिकस्मिन्नपिअनुरागातिशयंप्रकाशयंतीदूतीमाह सव्वस्समम्मीति
सर्वस्वंपिदग्धेतथापिहृदयस्यनिर्वृतिरेव यत्तेनग्रामदाहेहसाहसिकुंडोजलवहनार्थंघटोगृहीतः ३५ अवसरशून्यतयाकाचिदर्थि
कामुकमनोरथासंपादनासामर्थ्यंलक्षयंतींदूतीमन्यापदेशेनाह जायेज्जेति अजनिष्येवनोद्देशेनिर्मानुषेस्थानेकुब्जाख्यवृक्षोपिरव
लुनिशारवःझटित्तपत्रः मामानुषलोकेबहुप्रार्थकेजनस्तानेत्यागी दिक्षुःरसिकःसानुरागःशृंगारीचदरिद्रोनिर्धनः निरवसरश्चध्व
निनाबोधव्यः ३६ असतीजारप्रत्यनुरागातिशयंसूचयंतीतन्मित्रमाह तस्सअेति तस्यचरोभाग्यगुणेअमहिलासदृशंचसाहसंम

मजानातिगोदावरीवर्षारात्रीरङ्गवंच सतरंतदभिसरणार्थंकरोमीत्युक्तं ३७ कथमेवंहनिःस्नेहासीतिकेनापिनायकेनसपरिहासमुक्तंकु
लटातमाह तेचोलिआइति तेव्यतिक्रांताःदूरंगताश्चयस्याःसमानशीलाःयेषुतैःसहसुरतसुखमनुभूतं तेषांलतागृहाणांस्थाणवःशेषाःव
यमपिगतवयस्काः अतोमूलोच्छेदंगतमुच्छिन्नमूलंनष्टंमेत्यर्थः ३८ कामपिगतयौवनांप्रतिनागरकःसपरिहासमाह यणेति स्तनज
घननितंबोपरिदृशांनांकागतवयसांस्त्रीणांशून्यीभूतस्यानंगनिवासस्यमूलबंधाइवपीठाबंधाइवदृश्यंते ३९ दूतीनायकप्रलोभना
र्थंकस्याश्चिदतिसौंदर्यमाह जस्सेति यस्ययत्रैवप्रथमंतस्याअंगेनिपतितादृष्टिस्तस्यतत्रैवस्थितासर्वांगंकेनापिनदृष्टं ४० कोपिकस्याश्चिद्वि
रहेदुःखसंगमेचसुखातिशयंसूचयन्नाह विरहेइति विरहेदाहातिशयहेतुत्वाद्विषमिवविषमा अमृतमर्यीचभवतिकेवलामृतघटि
केवभवतितावत्संगमेअधिकंतत्समंमेवकिंविधिनाद्वाभ्यामपिविषामृताभ्यांविनिर्मिता ४१ प्रवासनिषेधार्थंवेश्यामातामुजंगमाह
अदंसेति अदर्शनेनपुत्रकस्नेहपिस्नेहानुबंधघटितानि हस्तपुटपानीयानीवकालेनगलंतिप्रेमाणि ४२ धूर्तःसहचरशिक्षार्थंस्त्रीणांमाभि
सरणोपायकौशलमाह पइपुरेति पत्युःपुरतएवनीयतेवृश्चिकदष्टेतिजारवैद्यगृहं अभिप्रायज्ञसरवीकरधृताविषवेगमूर्छाछलेनभु
जयुगलांदोलनशीलाबाला प्रगल्भायास्तुकेनवंकिंचिच्छक्यमितिभावः ४३ नीचजनस्यकार्यैकपरतांप्रकृतज्ञतांचसूचयंतींमूर्ख २२
सुभगंनववधूसंक्रांतस्नेहंकांतमन्यापदेशेनाह विक्कणइति विक्रीणातिमाघमासेपामरोनीच प्रावारंशीतत्राणावगुंठनवलीवर्देन
निर्धूममुर्मुरोयौवनसौभगस्यनशीतनिस्तारहेतुत्वात्निर्धूमो अग्निकूपाविवेत्यर्थः श्यामायास्तनोपश्यन् तवापीदानींलब्धनववधूक

स्यकिंमयाकार्यमितिभावः ४४ कदापिस्त्रीषुविश्वासोनकर्तव्यः इतिबंधुजनशिक्षार्थंकाचिदाह सच्चंभणामीति सत्यंभणामिमरणेस्थितास्मि
गृहीतमरणव्रतास्मिपुण्येतटेनाद्याः अद्यापितत्रलतागृहेअभिसारस्थानेनिपततिदृष्टिस्तथैव अभिसारोत्सुकैवेत्यागम्यः ४५ असतीमभि
रभिसार्यमाणाभर्तृकाकुलवधूःसर्वजनमाह अंधआरइति अंधकारकोलिफलवंडोलमिवमातरोममपतिंविलुंपंति चोरिकयागृह्णंति ईर्ष्ययं
तिमद्यमेवातोविपरीतमेववर्तंतेइत्यभिव्यंजयत्याह छिप्पाहिंतोदेशीयः छिप्पोलांगूलेशब्दःलांगूलेभ्यःफणाजातामोविहायतानएवेर्ष्यंती
तिभावः ४६ अलब्धलाभादितरजनस्योल्लासातिशयोभवतीतिप्रदर्शयन्नागरकःसहचरमाह अप्पेतेति अप्राप्तंप्राप्यनवकुसुंभवस्त्रं
नवरंगकंहल्लिकस्नुषा पश्यतन्वीनप्राप्तिप्रशस्तास्वपिग्रामरथ्यासु यथोचितमेवशोभते थापरिहासास्यदंभवतीतिसहचरशिक्षार्थमाह ४७
लज्जइइति शोभतेप्रभोर्लीलं स्वेच्छाक्रीडितंप्रियायामानःशोभतइतिसर्वत्रयोज्यं क्षमासमर्थस्य जानतश्चप्रणतंमानंचाजानानस्य अन्य
थात्वपहास्याएवस्युरित्याशयः अथवाअनुचितवचनविघटितप्रियसमागमंप्रतिकस्यचिद्रोषवादोयं ४८ कापिप्रियंप्रतिमन्मथलेखंलि
खंतिसख्योक्तातामाह वेविरेति वेपनशीलस्विन्नकरांगुलिकृतयापरिग्रहेणसवलितोलेखनीमार्गोयत्रतस्मिन्त्वत्स्वयंवनसमाप्यते प्रियस
खिलेखेकिंलिखसि एतेनकंपस्विदाभ्यांसात्विकभावाभ्यांप्रियंप्रत्यनुरागातिशयःसूचितः ४९ अपिकृतार्थासीतिकयापिष्टष्टासती
तामाह इच्छम्मीति देवेपराङ्मुखेवर्तंतेघटितमपिविघटतेनराणांकार्यं वालुकाप्राकारमिवकथमपिबंधमेवनदत्तेतिघटयितुमे
वनपर्यायते एतेनसपत्नीनांचमपिकार्यंनैवतवदद्यापिसिध्यतीतिभावः ५० मातुलान्यापूर्वोक्तसौंदर्यादिगुणस्यनायकस्यानुरागंका

पिमानुरागमाह मामाति मातुलानिहृषमिवपीतंतेनयूनामज्जंत्याःगद्विस्नानंकुर्वत्याजलपानछलावतीर्णेनमाकृतंमामवलोकयता मदंगंव
ङ्गमानयता हरिद्राकदुकमपिअनुस्रोतोजलंपिबता ५१ सर्वादंपत्योःप्रणयरोषभंगार्थमाह जिविअमिति । जीवितंआश्वासितमवननिव
र्तंतेयौवनमतिक्रांतं दिवसादिवसैःसमानभवति अहरहर्यौवनस्यकालस्यचपरिवर्तादित्याशयः एतदवगम्यकिंनिघृणोलोकः किमितिरोषपरु
षेणात्मानंवंचयतीतिभावः ५२ काचिदन्ययोषिदुपभुज्यमानविभवंप्रियंमासूयमन्यापदेशेनाह उप्पाइअंति उत्पादितद्रव्याणामपिरक्षानां
कोभाजनंरक्षएव एतदेवदर्शयति पक्वान्यपिनिंबफलानिकेवलंकाकैःखाद्यंते ५३ इंगितज्ञतांख्यापयन्नाकरकःसहचरमाह अज्जमए
ति अद्यमयागंतव्यंघनांधकारेपितस्यसुभगस्यअतांधकारगमनशिक्षार्थंइयंमहिलानिमीलिताक्षीपदपरिपाटीपादन्यासंकृमंगृहेकरोति
अज्जाशब्दोदेश्यांमहिलायामियंमहिलेत्येवकथितः ५४ कस्यचित्कृतविप्रियंजनंप्रतिप्रतिकूलाचरणवृत्तस्यप्रसादनायकश्चिन्सुजनप्रशंसा
माह सुअणोइति तस्मादनुचितमिदंसुजनस्यभवतीतिभावः ५५ भुजंगस्वीकृतद्रव्ययहणतात्पर्यार्थंवेश्यामातादुहितरमाह सीअथोइति
सअर्थः योहरंस यन्निरंतरंनिर्भेदंव्यसनेदेवायुपघातं तद्पंयत्रगुणाः गांभीर्यादयः तद्विज्ञानंशिल्पादिकौशल्यंयत्रधर्मः अथवाकस्याश्चिद्गु
णगर्वितायाः प्रतिपक्षांगनायारूपप्रशंसाक्षेपवादोयं ५६ चिरप्रवासागतोनायकः प्रियतमापरितोषार्थमाह चंदमुहीति चंदमुखीचंद्र
धवलादीर्घा दीर्घासीतवियोगे चतुर्यामाशतयामेव यामिनिकथमपिव्यतिक्रांतालंघिता मयेत्यर्थः ५७ दृष्ट्वाएवविदग्धाभावभाविकुर्व
तिलक्षयंतिचेतिनिदर्शयन्नगरकःसहचरशिक्षार्थमाह सहसोइति तयापितस्यैदंकर्तव्यमितिवदतः कस्यचिन्नशिक्षार्थंकश्चिदाह ॥ तेनममेदं

विप्रियंकृतंमथास्नुषयावध्वादृष्टोदरवलितापांगतारकःपथिकः यथाचारितोपिगृहस्वामिनाअलिंदकेगृहबहिःप्रकोष्ठकेसुप्तः ५८ लहु
अंतीतिलघयंतिलघुंकुर्वंतिलघुर्शाघ्रंपर्वतमात्रमपिपरमगुरुमपीत्यर्थः तदेवकार्यंथद्दयमाह लहुअंतिइति लघुकुर्वंतिलघुंपुरुषंपर्वत
मात्रमपिदुष्कार्यनिवरणंदुःखनिवेदनंअनिर्व्यूढेअकृतायांवरुधोयदुक्तं वचनंचापमानंचमतिमान्नप्रकाशयेदिति निर्व्यूढंचनिर्वरणं
फलेनैवतस्याविभावितत्वात्तिदितिभावः ५९ द्वारस्थितिकलितकुलटाभावांकुलजांकुट्टिनीविश्वासयितुमाह कत्तुगेति हेपुत्रीद्वारस्थितांक
मलोकयसिदूरनवलोकनार्थंपूर्वकायस्योन्नामितत्वात् तुंगस्तनोत्सिप्तनालएवोन्नामितकलशनिवेशितार्घ्यकमलेनैवमुखेन ब्रूहि साध
यामितेनमहमितिभावः ६० मुख्यर्थंनिषेधितोपिखलःप्रत्युत्तरहस्यमेवप्रकाशयतीतिप्रदर्शयन्नागरकः सहचरमाह वहइति वृतिघनीकरणा
र्थंतदुपांतरोपितत्वात्तवृत्तिविवरेणनिर्गतंदलंयस्यसएरंडः आमुग्रहस्तपुछाकारत्वाधस्तस्यदरवितनांकुचितपत्रांगुलिककराकारत्वाच्चपत्रस्यक
थयतीवतरुणीभ्याः अत्रगृहेहलिकवधूरियदुच्चस्तनीवसति ६१ कदाचिद्गुणाश्चदोषतांयातीतिनिदर्शयन्नागरकोभिसारिकायाःसत्वरा
भिसारगमनविरोधिस्तनभरंप्रत्युद्वेगेनाह गअकेति गजइवप्रोढःकलभोगजकलभस्तस्यकुंभसन्निभाभ्यांनिबिडस्थूलनीरध्राभ्यांउन्नतो
भ्योउसिनुमपिनशक्यतेकिंपुनर्गंतुंहतस्तनाभ्यां ६२ आशीच्छलेनवेश्यामातातद्विशेषप्राप्यारम्यत्वातिशयंरमणीयानांकथयंतीन
र्तकीदुहितरंप्रलोभयितुंभुजंगमाह मासपसूतांषण्मासगर्भिणींएकदिवसज्वरितांचचरंगोतनींचप्रियांपुत्रकामयमा
नोभव ६३ व्याजसुप्तास्तनयोरभिलाषंदर्शयन्पुत्रीयुवतींसपरिहासमाहापडिवक्खेति प्रतिपक्षमन्युपुंजोसपत्नीजनचित्तसोभ

हेतुत्वात् लावण्यस्य कुटीपुटो लावण्यनिर्भरत्वात् अनंगगजकुंभौविशेषणत्रयेपिपरकीयात्वेऽभिप्रायः पुरुषशतहृदयधृतवितिचिंताहेतु
त्वादनेकपुरुषायासकरौकींस्तनंतीकुर्यंतीस्तनौवहसि नचाभ्यांमद्विधंजनमुकैपेरोषीत्यभिप्रायः ६४ कदापिविरोधिनोप्यनुकूलाभवंती
तिदर्शयन्कश्चिदाह घरणीअेति गृहिण्याघनस्तनप्रेरणक्रूरपतितस्यभविष्यत्साथिकस्यअपशकुनाअंगारकवारभद्रादिवसा क्रूरायं
तेसुखहेतवोभवंति ६५ दूतीकर्मणियुवानंप्रतिकस्याश्चिदनुरागातिशयमाह सातुहेति सातवकृतेनबालकनिस्संगृहद्वारतोरणनिषणाअव
क्ष्यंति वंदनमालिकेववराकी ६६ सहजगुणहीनानांआहार्यालंकारादराः केवलमुपहासायेतिकाचिदन्यापदेशेनाह हसिअमिति पत्रफ
लबुध्याविश्रामार्थंशुकवटमुपगतैःपथिकैःपत्रफलसदृशंशुकवृंदेउड्डीनेसहस्रतालंहसितं ६७ पत्यासहकृतकलहायाः सख्याःरात्रि
वृत्तमधनुसंधायागतामसखीमातुलान्याष्टष्टांतसौभाग्यमाह अज्जहसीति अथास्मिहासितामातुलानितेनपादयोरुथापतता तयापिज्व
लंतींदीपवर्तिमभ्युत्तेजयंत्यातथापरुषवाहिनतस्यपादपतनादनंतरंतस्याश्चयौवनाद्यभिमानंपतिंप्रत्यनादरंदृष्टाममहासौजातइ
त्यर्थः ६८ पूर्वसुभगासमसंविभागक्लिष्टांस्वसौभाग्यमबहुमन्यमानांनवसुभगांसात्वयितुंसखीसुजनस्वभावमाह अणुवत्तेति
अनुवर्तनंकुर्वन्नद्वेष्यपिजने अभिन्नमुखरागः आत्मवशोपिसुजनःपरवशः कुलीनतयाः एतेनलवदेकगतीकोपीकुलीनतयातामनुवर्त
तेनतुस्नेहेनेतिभावः ६९ पूर्वसुभगातिकारप्रवृत्तंदुर्विदग्धंशिक्षयंतीजगद्बंधुवधूराह अणुदिअहेति अनुदिवसवर्धितादरविज्ञानगु
णोर्जनितमाहात्म्यः पुत्रकुलीनजनोविरज्यमानोपिदुर्लक्ष्यः तन्नोचितमिदंभवतइतिभावः ७० विदग्धंप्रतिजाताभिलाषाकाचिन्नदव

काशनायस्वाभिप्रायमाह विणाणेति विज्ञानगुणमाहार्यपुरुषेहेयत्वमपिरमणीयं जननिंदितेपुनर्जनेप्रियत्वेपिलज्जामहे ७१ कोपिकस्या
श्चित्स्तनयुगंस्मरन्स्त्रीणामस्थिरप्रेमतामाह कहणामेति कथंनामतस्यास्तथास्वभावगुरुकमपिस्तनयुगंपतितं अथवामहिलानांचि
रंहृदयेकोनामसंतिष्ठते स्त्रीणामस्थिरप्रेमतयाहृदिनकोपिसम्यक्तिष्ठतीत्यर्थः असंभाव्यप्रथमोनामशब्दोद्वितीयस्त्वनुमतो ७२ पल्ल
विकानिवारितापांयुवतींयुवासाभिलाषमाह मुअणुइति सुतनुवदनंस्पृशंतंसूर्यंमापल्लविपल्लवच्छत्रिकया साउलिअपल्लवछत्रि
कायादेशीवारयसि एतस्यपंकजस्यजानातुकतरत्क्रूरस्पर्शं ७३ नागरकःसहचरंमानिनीमानशमनोपायशिक्षार्थमाह माणोस
हंवेति मानोषधमिवपीयते प्रिययामनस्विन्यादयितस्यकरंसपुटवलितोर्धाननयावदनमदिरागंडूषः क्रूरापूर्णेनमुखेनदत्तासुरापीता
मानमपनयतीतिभावः ७४ दूतीनायकमनुरंजयितुंनायिकायाःसौंदर्यातिशयमाह कहसेति कथंसानिर्वर्ण्यतांयस्यायथाल्लो
ता८ किंतेप्रसाधनेपिदृष्टेदृष्टिर्दुर्बलागौरीवपंकपतितानोत्तरति यत्रपतितंत्रैवावतिष्ठतेइत्यर्थः ७५ नायकस्यसौजन्यंवर्णयित्वा
तंप्रतिनायिकायाःप्रेमानुबंधार्थंदूतीस्वसुजनयोःस्वभावमाह किरतिञ्चिअेति क्रियमाणेवनस्थितिरुदकेरेखेवखलजनेमैत्री
सापुनःसुजनेकृतानघानिरपायापाषाणरेखेव ७६ चिरप्रवासागतवल्लभापुनरपिप्रविविक्तंसंदेश्यमाह अहोविति अहोइति
दुःखसूचनायां हेदुष्करकारकस्त्रीविधनिर्भयपुनरपिचिंतांकरोषिगमनस्य अथापिनाभवंतिसरलाःअवक्राःवेण्यास्तरंगिणाःकोटि
ष्वमाजःचिकुराःकेशास्तत्किंनपश्यसिविरहविदशांममेतिभावः ७७ अव्युत्पन्नत्वादनुसहमानस्यदुर्विदग्धधनिकस्यप्रवृत्तिपाटवार्थंधू

र्तासङ्गावस्तुनिमाह णविनहेति छेकानामपूर्वापूर्वशिल्पिकुशलानांरतान्यपितथानहरंति तथापुनरुक्तेपुनःपुनःशीलितरागेरंजनेरत
व्यापारेरसिकानि यथायत्रबातत्रबायथाबातथाबातथासङ्गावरमितानि ७८ किमितिकशासीतीप्रियेणपरिहृता सङ्गावतमेबाह हृदमू
लेति अनुरागनिर्भरालिंगनवशादन्योन्यलग्नेहृदमूलबद्धग्रथाइवमोचितोकथमपितेनमेबाह अस्माभिरपितस्योरसिनिरबाताविवकथम्
पिसमुत्बातोत्तनौ ७९ पूर्वसुभगातमाह उम्बसीति ऊह्यसेप्रिययासमं प्रियासहितंत्वासततंचिंतयामीतिभावः तथापिचमांभणसिकिं
कृशाह्यतेति उपरिसेरेणहेअङ्गमुंचतिबलीवद्दीर्घ्यंगानि ८० कलहांतरिताथीमनुनीयागतादूतीतत्कांतमाह अणुणएति अनुनयप्र
सादितयातबापराधानचिरंगणंयत्या अपराधानांबहुत्वादप्रभृताउभयहस्तांगुल्यायस्यास्तथाचिरंरुदितं ८१ वनविहारादिपरिश्रांतो
कांतानिर्वर्णयन्नागरकमनसरबीमाह मेअछलेणेति स्वेदछलेनपश्यतनुंकेअंगेतस्याअमात्र लावण्यमपसरतीवत्रिवलीसोपानपंक्ति
भिः ८२ भुजंगरोचयितुंकृष्णीकस्याश्चिदलब्धलाभसत्कारतादोषंपरिहरंतीसौंदर्यातिशयमन्यापदेशेनाह देछाअेति कंकेल्लिरशोकः
देवापतफलेकिंक्रियतां इयत्युनभणामः अशोकपल्लवाःपल्लवानामन्येषांनसदृशाः अयमाशयः देवाधीनोलाभसत्कारोनभवतोनामत
स्मदर्शापुनःसुंदरीस्त्रितिनास्तीति ८३ स्वसौभाग्यख्यापनायविरहविधुरांरुदंतीकहोंलेतरिताकांतादर्शयंस्तदनुयार्थमागतसत्कां
तःसहचरमाह पुअइवेति प्रक्षालयतीवमृगकलंकंकपोलपतितस्यामानिनीपश्यत अनवरतबाष्पजलभृतनयनकलशाभ्यांचंद्रस्य
एतेनात्मसौभाग्यंप्रियायाःकांतिश्चवर्णिता ८४ किमियमवश्यंभतुर्बहुवल्लभस्यबल्लाभाभविष्यति येनपुनरिहनागमिष्यतितत्किमेवं

२५

विङ्कवोसातीवयस्येनाश्वास्यमानोज्ञातिगृहास्यतिगृहंप्रस्थिताथाजारस्त्रीमन्यापदेशेनाह गंधेणेति आत्मनोगंधेननवमालिकानांमध्ये
नच्युताभविष्यतियतः अन्यःकोपिहताशायाइतिनिर्वेदसूचकंवचनंमांसलोनद्यःपरिमलोद्गारः ८५ कथमपिनष्टधनस्वनायकस्यवेम
नस्यमाश्वस्यनायकांतसंगमंप्रतिनिरुत्साहामुत्साहयितुंसत्पुरुषप्रशंसामाह फलसंपन्नानीति फलसंपन्नाश्रमवनतानिनम्राणितुंगान्युन्नतानिफ
लविपर्ययांहृदयानिसत्पुरुषाणांमहतांतरूणामिवशिखराणि अथवानष्टधनस्यमित्रस्यखेदापनोदापकस्यचित्अयंवादः ८६ पथिकजायास
खीनासंवादमाह आसासेइति आश्वासयतिजीवतिइतिज्ञापयतिपरिजनंपरिवर्तमानायाः शयनेपार्श्वपरिवृत्तिंकुर्वत्याःपथिकजायायाःनिद्रानि
मित्तंयद्वर्तनंतेनवलितेहस्तेमुखरोनुबद्धअनुभवज्ञानाल्करोवलयशब्दः एतेननवमीकामावस्थासूचिता यदुक्तं तूष्णींभावोविचेतस्त्वंजड
तायाभवंतिहीति ८७ महेछनायकानुरंजनार्थंनायकस्यवदान्यतांपरोपकारितांचप्रशस्यावयितुंदूतीकृपणानिंदांसत्पुरुषस्यचप्रशंसामाह पोट्टं
भरंतीति हेमाउ आमहिलाःशकुनाअपिपरमांसमुज्झितागृध्राअप्युदरंबिभ्रामति अनुद्विग्नाःस्वोदरभरणमात्रसंतुष्टाःविद्वल्लोधरणाभरसादी
नदुःखापहारकधुरंधराभवंति यदिकेतिसत्पुरुषाःविरलाएवतद्देशाइत्याशयः ८८ नायिकामनुरंजयितुंदूतीक्षीणविभवस्यापिनाय
कस्यमहेछतांसूचयंत्याह तुंगोद्धिअेति तुंगमेवभवतिमनोमनस्विनअंतिमावस्थापिदशाम एतदेवदृष्टांतेनदृढयन्नाह अस्तमनेपिरवेः
किरणाऊर्ध्वमेवस्फुरंति एतेननिर्धनोप्यसौवदान्योनन्याधमंकामयतइत्यर्थः ८९ कृत्रिमेणापिभावेनभामिन्योमनुष्यानुरंजयंतीति
कयाचिदुक्ताविदग्धवधूस्तामाह णविणासेति नविनासद्भावेनगृह्यतेपरमार्थज्ञोलोकः एतदेवदृष्टांतेनाह कःजीर्णमार्जारंखंजिकेनप्रतार

थिनुंशङ्कोति निरपेक्षमेवप्रेमश्रेष्ठमित्याह रणाउइति अरण्यात्तृणंअरण्यात्यानीयंसर्वतःस्वयंग्राह्यं तथापिमृगाणांमृगीणांचामरणां
तानिप्रेमाणि ईदृशंतत्प्रेमश्लाघ्यमितिभावः ९० प्रेमसद्भावसूचकोदुःखहेतुरपियथाऽरुचयतिननथाऽरुचहेतुरपीतिनिदर्शयन्नागरकःसहच
२६ रमाह तावमेति तापमपनयतिननथाचंदनपंकोपिकामिमिथुनानां यथादुःसहेनिपीड्यौन्योन्यालिंगनरुचं ९२ मुग्धवधूवृत्तविरुद्धा
प्रथमरजोयोगासूचनव्युत्पत्तिमापत्त्याःसपत्नीदुश्चरित्रव्यापनार्थमाह तुपालेति प्रथमइतिशब्दोवाक्यसमाप्तौद्वितीयःप्रदर्शने घृतलिप्तानना
किंतिष्ठसीतिइतिष्टयामुग्धयाअव्युत्पन्नयानववध्वाकिलेत्युपालंभः द्विगुणावेष्टितजघनस्थलयाप्रच्छादनेनेवार्तवमाविष्कुर्वंत्येतिभावः ९
थचत्वमेतदपिनजानासियन्मलवद्वासमासंभाषानिषिद्धाहमित्यहोअवेदग्ध्यांतवेतिभावः लज्जयाअवनतंयथास्यातथाहसितं ९२ कुल
स्त्रीवृत्तशिक्षार्थंबंधुवधूःकुलवधूमाह हिअअेति हृदयएवबिलीनःनकथितोज्ञानयित्वागृहसारंबाधवदुर्वचनमिवदोहदोदुर्गतवध्वा ९४
कुलस्त्रीचरितविरुद्धंसपत्न्याधार्ष्ट्यंव्यापयंतीकापिबंधुवधूजनमाह धावईति धावतिविगलितस्यधम्मिल्लस्यासंजितकेशकलापस्यसिचय
स्यवस्त्रस्यसयमनेव्यावृत्तोकराग्रोयस्याःसातथागौरवभयान्नापितभयेनविपलायमानस्यडिंभस्यबालस्यपरिमार्गानुगमनशीलागृहिणी चलि
दइतिनापितार्थदेशी ९५ अभियोज्यनायकप्रलोभनार्थंदूतीनायिकावयःसौभाग्यंचाह जहजहेति यथायथोद्वहतिवधूर्नवयौवनमनो
हरण्यंगानि तथातथास्यास्तनुकायेनमध्योदयितप्रियःप्रतिक्षेपेसपत्नीजनश्च ९६ बंधुवधूःकुलशिक्षार्थंपतिव्रतामाह जहजहेति
यथायथाजरापरिणतोभवतिदुर्गतोविरूपश्च कुलपालिकानांतथातथाधिकतरंवल्लभोभवति ९७ कमपियुवानंप्रतिसाभिलाषाकामिनी

समानवयःशीलामातुलानीमाह एसोमामीति एषमातुलानियुवावारंवारेणानेकवारैर्यअउअणाओअसत्यःग्रीष्मेयामेकावटोदकमिव
कृच्छ्रेणप्राप्नुवंति तत्रयांपुनरन्याःमत्तइतिशेषः एतेनस्वसौभाग्यप्रगटनंनायिकायाइतिभावः ९८ संकेतस्थानमुद्दिश्यजारंश्रावयंतीअसती
सतीवकुलटानिंदांकुर्वतीपितृभगिनीमाह गामवडस्सेति ग्रामवटस्यपितृष्वसःप्रियविरहखेदेनापांडुरमुखीनांहृदयेनसमंआपांडुरछायंपत्रंवा
ताहनंपतति ९९ इंगितज्ञमात्मनःरक्षापयन्नागरकःसहचरमाह पेछइति पश्यत्यलब्धलक्षंदीर्घंनिश्वसितिशून्यंहसति यथाजल्पत्यस्फुटार्थं
तथास्याहृदयस्थितंकिमपि अनाम्नेतिप्रतीयतइतिभावः ३०० इतिसप्तशतकतृतीयशतकविवरणं ३ ॥ रसिकजनहृदय
दयितेकविवत्सलप्रमुखसत्कविनिर्मिते सप्तशतकेगाथासंतृतीयंगाथाशतकमेतत् नागरकःसहचरशिक्षार्थंसख्याःप्रत्यक्षप्रतिमाह
स्मा गहवईति गृहपतिर्गतोयमस्माकंशरणंरक्षेनमिति असतीभणित्वा सहसागतस्यत्वरितंपत्युरेवजारमर्पयति १ निह्नूयमानोभावःस्वभा
वादेवाविर्भवतीतिनिदर्शयतीसखीशिक्षार्थमाह हिअअट्ठिआएति हेपितृष्वसः हृदयेस्थितोःस्माकंकुमारीणांकुत इतिभणित्वातत्क्षणम
तीतप्रियस्मरणावेगान्मोहंगताकुमारी २ अभियोज्यनायकप्रलोभनायदूतीनायिकायाःस्मरणावसानोपचारश्चातुर्यमाह रिवणास्सेति
रिवण्णस्योरसिपत्युःस्रापयतीग्रीष्मापराह्णरमितस्यआईगलत्कुसुमंस्नानसुगंधीचिकुरभारं ३ ज्योत्स्नायांकेलिरसिकोयुवाकांतायाःक
पोलकांतिनात्मनश्चदर्शनशिल्पंनिर्वर्णयन्नाह अहसेति अयंसरसदंतमंडलेकपोलेप्रतिमागतःसंक्रांतोमृगाक्ष्याः अंतःसिंदूरितशरत्पा
त्ररूपविहितचंद्रः ४ नागरकःसहचरंशिक्षयन्नसत्याःजारनिह्नवंप्रत्युत्पन्नमतित्वमाह अहअहोति अयमस्माकंमागतोद्यकुल

गृहादित्यसतीजारंसहसागतस्यत्वरितंपत्युःकंदेलापयति छेछइ असतीवाचकोदेशीशब्दः५ अविषयेपिपत्युरनयंसख्यामपश्यंतीसखी
सख्याःसौभाग्यमाह पुसिआइति प्रोञ्छिताःकर्णाभरणेंद्रनीलाकिरणाहताःशशिमयूखाःमानिनीवदनेसकज्जलाश्रुशंकयादयितेन ६सा
नुरागोयुवाकस्याश्चिल्लोंदर्यस्यानयसमतामाह एद्दहमत्तम्मीति एतावन्मात्रेजगतिसुंदरामहिलासहस्रसद्भेपि अनुहरंतिकेवलंतस्याःवामा
ङ्गंदक्षिणाङ्गस्य तस्यावामांगार्द्धंदक्षिणांगार्द्धमनुकरोति नत्वस्यावयवांतरमुपमानमस्ति ७ किंमानविमुखीत्वमसीतिसख्योक्ताका
प्यात्मनोनुरागंस्थिरस्नेहतांपत्युश्चमानामहिष्णुतांसूचयंतीतामाह जहजहेति यायायथावादयतिप्रियस्तथानृत्यामिचंचलेप्रेम्णि वल्लीव
लयत्यंगंस्वभावस्थितेपिवृक्षे वल्लीलतावलयतीवेष्टयतीत्यर्थः ८ कस्मिन्नपिकाप्यनुरक्तातमनुरागंश्रावयंतीसखीमाह दुक्कवेहीति दु
रवेर्लभ्यतेप्रियोलब्धोदुःखेर्भवतिस्वाधीनः लब्धोप्यलब्धएवयदियथाहृदयंतयानसवति ९ कापिकलहांतरितांजातानुतापांप्रियस
खीमाह अधोएति अधोदृतिकष्टदेशीयः कष्टमनुनयसुखकांक्षणशीलयाकृतंकृतंकुर्वत्यासरसस्वभावोपिप्रियोविनयमार्गेवलान्नीतः
करोतिरत्रोच्चारणे अकृतमप्यपराधंकृतमितिसमुच्चारयंत्येति १० इतीकस्याश्चिद्विरहार्तिकापिप्रोषितप्रियोयेह हस्येस्थिति हस्तयोरपि
पादयोपि अंगुलीगणनयाअतिगतादिवसाः इदानींपुनःकेनगण्यंतामितिभणित्वारोदितिमुग्धा ११ सखीसखीकांतस्यगमनविघातार्थं २७
मशकुनगर्भवसंतवर्णनमाह कीरमुखसदृक्षैः राजतेवसुधापलशकुसुमैः बुधस्यचरणवंदनापतितैरिवभिक्षुसंघैः देवताराधनलोकइ
यहेनुःशाकमुखसादृश्येनरक्षतांकृतित्वंलक्ष्यते तेनचप्रियदत्ताईनखांकितमुरःस्मरंतीप्रियस्मरणसंजातविरहदुःखावेगेतिभावः १२ अनु

नयस्मरणायप्रेरयंतीसखीमानिनीमाह जंजमित्यादि यद्यत्थुमंलभंगतन्नजातंकृशोदरिकृशंते यद्यतनुकृंतनरदपिनिष्ठितंकिमत्रमानेन निष्ठितं
निष्ठाप्रकर्षंगतमितिदुर्बलंजातमित्यर्थः १३ पत्युरवनसावल्लभातंकथंतस्यागुणान्स्तोष्यीरित्यभियोज्येनोक्तादूतीमाह णगुणेति नगुणेनाङ्कि
यंते जनङ्कियंतेयोयेनभावितस्तेन एतदेवार्थांतरन्यासेनदृढयति मुक्तापुलिंदामौक्तिकानगुंजाःगृह्णंति १४ गमनायष्टष्ठाकिंमितिकि
मिपिनवदसीतिप्रियेणोक्तायाःसंबंधिनीतत्कांतमाह लंकालेति दृष्टपक्षे लंकालयानांपुत्रकवसंतमासेकलब्धप्रसराणांआपीतलोहिता
नाविसेतिजन पलाशानां लंकाशारवाः पीतलोहितानां इयंतुपीतरक्तानां राक्षसपक्षे लंकारावणनगरी वसंतमासेकलब्धप्रसाराणां
वसाप्रसिद्धा अंत्रमुदरस्थितं प्रादालक्षणकृतमनुस्मारलोपादिकं अथवा वसंतमांसंवसतमस्तिष्ठतोजनस्यमांसं आपीतलोहितंरक्तंये
षु आपीतलोहिताः पलंमांसमश्नंतिखादंतिइतिपलाशाः राक्षसाः पलाशानामितिशेषविवक्षयापंचम्यर्थेषष्ठी इवादिशब्दंविनापिशेषो
भवति देशांतरंगछंतंपुत्रंनिवारयितुंमातुरुक्तिर्वा १५ सखीसख्याःकांतंप्रत्युरागातिशयमाह चेत्तूणेति गृहीत्वाचूर्णमुष्टिंहर्षोत्क
र्षितायावेपमानायाः विच्छुरामीतिप्रियतमहस्तेनगंधोदकंजातं चूर्णमुष्टिः कर्पूरादिधूलिःभिसणेमीतिविच्छुरणेदर्शा कांतदर्शनजात
सात्विकभावस्वेदायाइतिभावः १६ सपत्नीदेवराभीसारंसूचयंतीसपत्नीमाह पुहिंपुइति दृष्टंप्रोञ्छकृशोदरिपश्याद्वाटांकोटपत्रचित्रि
तं छेकाभिर्विदग्धाभिः ऋजुकेमाकलयिष्यसि परोहरंपश्याद्वाटःपश्याढ्यंवा अंकोठोवृक्षभेदः देशीशब्दद्वयं १७ आगतःप्रियोनालो
कनीयइतिमानंकुर्वितिकयापिकाप्युक्ताइदमाह अच्छीइंइति अक्षिणीनावत्सखगयिष्यामिद्राभ्यांहसाप्यांतस्मिन्दृष्टेअंगकदंबकुसु

मभिवपुलुकितंकथनुरुद्गयिष्यामीत्याह्लादयिष्यामि दोहिमितिइकारःपादपूरण ढक्कीम्समितिदेशी १८ वर्षाकविरहदुःखिताःप्रियांस्मरन्
पथिकःपथिकांतरंगृहगमनायाह हंहवेति हंहोवातोत्रृणितेगृहेरुदित्वानिस्सहनिषण्णांदर्शयतिगतपतिकांविधुधोतोज्ज्वलधराणां अत्रकु
ट्टिनीनायकवृत्तांतोव्यंग्यः तेनचविरहदुःसहतातयाचनायकस्यशीघ्रागमनमिति १९ दूतीग्राम्यसंभोगप्रतिमंदादरंनायकंभवर्तयितुमन्या
पदेशेनाह भुंजरुइति भुक्त्वयत्वाधीनंकुतोलवणंकुर्याम्सिध अथवासलोणेनापिकीतेनस्नेहोयत्रनास्ति लवणंकांतिःसामुद्रकंचस्नेहः
प्रेमघृतादिकंच २० स्नेहयोगादिरसमपिरूक्षंभवतीतिकापिकस्यामप्याह सहइइति मुखदृष्टिकायाहालिकोमुखपंकजरूक्षमपिपवनति
र्वोपितंतथापिवतिप्रकृतिकटुकमप्योषधंयथानतिष्ठति रूक्षदृष्टिकाकल्याणवार्तांकारिकाप्रकृतिकटुकंस्वभावतिक्तंननितिष्ठतिनिष्ठांप्रक
र्षयतिपानंनगछतिधैर्येणपिबतीत्यर्थः अनुरागातिशयादितिभावः २१ कस्याश्चित्सखीकृतसंकेतेजारेनामतइदमाह अहसेति अथसा
तत्रतत्रैवकांतारवनेत्यक्तसंकेतातदर्शनंविमार्गयतिप्रभ्रष्टनिधानस्थानमिव वानीरोवेतसः अतस्तामनुकंपयस्वासदर्शनेनेत्याशयः २२
नायकःसहचरंकृतापराधभयान्नायकोपसर्पणविमुखयितुमाह दरोषेति दरोषकलुषितस्यापिसज्जनस्यमुखादप्रियंकृतः राहुमु
खइवशशिनः किरणाअमृतमेवमुंचति २३ कापिजारात्तिमतसन्नानत्कृतोपहारंपरिहरंतीकोत्रदोषइतिदूत्यायाच्यामानाइदमाह अव
माणिओइति अपमानितोपिनतथासज्जनोदूयते विभवहीनःप्रतिकर्तुंमसमर्थोमन्यमानोयथापरेण २४ कृतस्यापितंयथाहस्तेकरुवि
श्वासकथनायप्रोत्साहयंतीदूतीनायकामन्यापदेनपरिहारमाह कलहेइति कलहांतरेर्ष्याविनिर्गतानिहृदयांतरेज्वरमुपगतानिसज्जन

कृतानिरहस्यानिदहत्यायुःक्षयेन्मिः अपिर्निषेधे २५ कस्मिंश्चित्सथिकेकस्याश्चिद्दुःखवार्तांकाप्याह लुंबीओइति स्रवकांगणमाधवीनांद्वारा
र्गलाज्ज्ञाताः आश्वासःपथिकप्रलोकनेपिनष्टोगतयतिकानां प्राकृतेपंथोवर्त्मपथिकस्य लुंबीस्रवकोमाधविलताविशेषे अतिमुक्तकेवा अत्र
सामान्योपक्रमेणवनायिकाविशेषंप्रतिपादयंतीदूतीदिवेवकामुकंप्रेषयतीतिव्यंग्योर्थः २६ सखीसख्याः कांतंप्रतिअनुरागेनयनप्रशंसाचा
ह पिअदंसणेति प्रियदर्शनमुखरसमुकुलितेयदितस्यानभवतोनयने तदाकेनकर्णरचितंलक्ष्यतेकुवलयंतस्याः सेतिस्माइति संबंधने
दात्यर्थाद्दयमपिनदोषाय २७ अभ्युदयेहेतुरपिकार्यवशादुद्वेगंजनयतीतिकापिकस्यामप्याह चिक्खिलेति कर्दमक्षिप्तहलमुषकर्षणप
रिश्रांतेपत्योप्रसुप्ते अप्राप्तमोहनस्रवाघनसमयंपामरीशपतीचिकिबद्धंकर्दमः स्रुतंक्षिप्तं सहिअंश्रांतंमोहनंसुरतंशयतिनिंदतीत्य
र्थः २८ प्रियस्यविरहदुःखंसंगमेचसुखंजयंतीनायिकास्मरशरनमस्कारमाह दूमेतीति दूनयंतीदहतिसौख्यंकुर्वंत्यनुरागंरमयंति
अरतिबांधवेक्ष्योनमोनमोमदनबाणेभ्यः दुःखसुखदानादरतिरतिबाधवाःशराः २९ कापिकामबाणव्यापारंवैचित्र्यवर्णनेनकथायामिलाषिनं
युवानंप्रतिमन्मथव्यथामाह कुसुममयाअप्यतिखराः अलब्धस्पर्शाअपिदुःसहप्रतापाःभिंदंतोपिरतिकराःकामस्यशराःबहुविकल्पाः ३०
उत्कंठाविनोदार्थंप्रोषितभर्तृकाप्रियगुणानाह ईसंजेति ईर्ष्याजनयंतिमन्मथंविप्रियंसहायंतिविरहेनदद्यातिभर्तुंअहोगुणास्तस्य
बहुमार्गाःतस्यप्रियस्यप्रियाश्चर्यकरागुणाइत्यर्थः ३१ वाचनकव्याजेनानुरक्तागृहंगृहंभर्तासातवापिगृहंगतातथापित्वंनयान
दृष्टइतिदूतीकाश्चिच्चिदाह णिआंइइति नीतांन्यधिनिकृष्यपिनहूनवरंगयावराक्यागृहपरिपाट्या पहेण अणाइ उत्सवेवाचन

कादेशीयः नवदर्शनाशयागृहपरिपाटीगृहानुक्रमः नवरंगकंनूतनरक्तवस्त्रं अयमाशयः धन्यस्त्वमसियमुत्सवव्याजेनगृहभ्रमणखेद
मगणयंतीत्यादिदृशतइत्यतस्तामिदानीमात्मदर्शनेनानुकंपस्वेति ३२ अदृष्टोःश्रुतोऽर्थः प्राङ्नैर्लिंगदर्शनाल्लक्ष्यतइतिनिदर्शयन्कोपि
२९ सखायमाह सक्चज्झईति सूच्यतेहेमंतेदुर्गतःकरीषाग्निसूगंधेनधूमकपिलेनपरिविरलतंतुनाजीर्णपटकेन पुंफुआणोविस्पष्टाग्निर्दे
शी ३३ कश्चित्पथिकःशीतेनपलालस्कूप्रः दौर्गत्यसूचकंवैकृत्ययथाकथंचित्परिहर्तव्यमितिकापिकंचिदाह खरसीति खरपलालोल्लि
खितानिकरोतिपथिकोहिमागमभ्रमाते आचमनाजलार्द्रितहस्तस्पर्शमसृणान्यंगानि ओल्लिओ आर्द्रितो सिप्पिरंपलालःदेशीशब्दद्वय
३४ परिगृहातोन्नमस्त्रीकमधमंचोरमिवाभिईवतिकामुकः अनुत्कृष्टयउत्कृष्टनायिकापरिग्रहरसिकस्यनिषेधमन्यापदेशेनाह
२८ णकुवइति नरवोत्खंडितमहकामेमंतरीषामरशीर्षबर्हमिवक्रियमाणाभ्रमरयुवानोनुसरंति उक्कुहिअमुत्खंडिते ३५ विदिता
